## नेयङुवङ्स्थानावस्त्री । (४/३०३)

पूर्वेणातिप्रसक्ता नदीसञ्ज्ञा प्रतिषिध्यते । स्थितिः स्थानम्[1] । इयङुवङोः स्थानमनयोः इतीयङुवङस्थानौ, तौ [2]यू नदीसञ्ज्ञौ न भवतः, स्त्रीशब्दं (६.४.७९/३०१) वर्जयित्वा । हे श्रीः । [3]हे भ्रूः । (६.४.७७/२७१) । अस्त्री इति किम् ? हे स्त्रि (७.३.१०७/२६७)[4] ॥

## वाऽऽमि । (५/३०४)

पूर्वेण नित्ये प्रतिषेधे प्राप्ते [5]आमि विकल्पः क्रियते । [6]इयङुवङस्थानौ यू आमि[7] परतो [8]वा नदीसञ्ज्ञौ न भवतः । [9]श्रियाम् (६.४.७७/२७१), श्रीणाम् (७.१.५४/२०८) । भ्रुवाम्, भ्रूणाम् । अस्त्री इत्येव, स्त्रीणाम् ॥

## ङिति ह्रस्वश्च । (६/२९६)

दीर्घस्य [10]नदीसञ्ज्ञा विहिता, ह्रस्वस्य न प्राप्नोति, इयङुवङस्थानयोश्च प्रतिषिद्धा[11] । तस्मान् ङिति वा विधीयते । ङिति परतो ह्रस्वश्च य्वोः सम्बन्धी [12]यः स्त्र्याख्यः, स्त्र्याख्यौ इयङुवङस्थानौ च यू वा नदीसञ्ज्ञौ भवतः । कृत्यै (७.३.११२/२६८), कृतये (७.३.१११/२४५) । धेन्वै, धेनवे । श्रियै, श्रिये । भ्रुवै, भ्रुवे । अस्त्रो इत्येव, स्त्रियै । स्त्र्याख्यौ [13]इत्येव, अग्नये । [14]वायवे । भानवे ॥

## शेषो घ्यसखि । (७/२४३)

ह्रस्वः इति वर्तते । शेषोऽ[15]त्र घिसञ्ज्ञो भवति, सखिशब्दं वर्जयित्वा । कश्च शेषः ? ह्रस्वम् इव-र्णोवर्णान्तं [16]यन्न स्त्र्याख्यम्, स्त्र्याख्यं च यन्न नदीसञ्ज्ञकं, स शेषः । अग्नये (७.३.१११/२४५) । वायवे । कृतये । धेनवे । असखि इति किम् ? सख्या । सख्ये । सख्युः । सख्यौ । [17]घिप्रदेशाः—'द्वन्द्वे घि' (२.२.३२/९०३) इत्येवमादयः ॥

## पतिः समास एव । (८/२५७)

पतिशब्दस्य घिसञ्ज्ञायां सिद्धायामयं[18] नियमः क्रियते, पतिशब्दः समासे एव घिसञ्ज्ञो भवति[19] । प्रजा-पतिना । प्रजापतये[20] । समासे इति किम् ? पत्या । पत्ये[21] । [22]एवकार इष्टतो[23]ऽवधारणार्थः । दृढ-मुष्टिना । दृढमुष्टये ॥

---

1. नाम इत्यधिकम् फ. 2. यू नास्ति ह. 3. हे भ्रूः नास्ति फ. 4. स्थानग्रहणम् किम् ? प्रध्यै, वर्षाभ्वै इत्यधिकम् क. 5. आमि नास्ति ह, आमि विकल्प्यते अ. 6. इयङुवङौ आमि परतः फ. 7. षष्ठी बहुवचने इत्यधिकम् अ. 8. वा नास्ति क. ह. 9. श्रियाम् नास्ति फ. 10. विहिता नदीसंज्ञा फ. 11. प्रति-षेधात् ह, तदर्थं च वचनम् इत्यधिकम् अ. 12. यः नास्ति ब. ड. 13. इत्यपि ब. 14. वायवे नास्ति ह, भानवे नास्ति फ. 15. अत्र नास्ति फ. ह. 16. यदस्त्र्याख्यं अ. 17. वाक्यमिदं नास्ति ब. ह. ई. 18. अयं नास्ति ड. फ. ह. 19. नान्यत्र इत्यधिकम् फ. 20. सेनापतिना, सेनापतये इत्यधिकम् क. 21. पत्युः, पत्यौ । कथमन्यत्र पतिना सह । तत्रानिर्दिष्टत्वात् । अथवा छन्दसि सर्वे विधयो विकल्प्यन्ते । छान्दसोऽयं प्रयोगः इत्य-दोषः । इत्यधिकम् अ. क. 22. एवकारकरणं अ. क. 23. अवधारणार्थं क.